# Vikata Stuti by Devarshi

# વિકટસ્તુતિઃ દેવર્ષિભિઃ પ્રોક્તા

## Document Information

Text title : Vikata Stuti by Devarshi

File name : vikaTastutiHdevarShibhiHproktA.itx

Category : ganesha

Location : doc_ganesha

Transliterated by : Ajit Krishnan

Proofread by : Ajit Krishnan, PSA Easwaran

Description/comments : Mudgalapurana, Khanda 6, Adhyaya 36

Latest update : April 23, 2020

Send corrections to : sanskrit@cheerful.com

This text is prepared by volunteers and is to be used for personal study and research. The file is not to be copied or reposted without permission, for promotion of any website or individuals or for commercial purpose.

**Please help to maintain respect for volunteer spirit.**

Please note that proofreading is done using Devanagari version and other language/scripts are generated using **sanscript**.

April 28, 2023

*sanskritdocuments.org*

# વિકટસ્તુતિઃ દેવર્ષિભિઃ પ્રોક્તા

આદિશક્તિરુવાચ -
કામાસુરં મહાશાન્તિયુતં દૃષ્ટ્વા સુરર્ષયઃ ।
વિસ્મિતા વિકટં પૂજ્યં તુષ્ટુવુઃ કરસમ્પુટાઃ ॥ ૧॥

દેવર્ષય ઊચુઃ
અજં પુરાણં પરમવ્યયં ચ સદાત્મરૂપં સકલાવભાસમ્ ।
અસદ્વિહીનં વિવિધાન્તરસ્થં ભજામહે તં વિકટં પરેશમ્ ॥ ૨॥

અનાદિમધ્યાન્તવિવર્જિતં યત્સુજીવનં જીવનધર્મધારમ્ ।
સદાઽમૃતં બ્રહ્મ વિકારહીનં ભજામહે તં વિકટં પરેશમ્ ॥ ૩॥

ત્વયૈવ માયા રચિતા સ્વબિમ્બાત્ સ્વયં દધૌ જીવનબિમ્બવીર્યમ્ ।
બભૂવ યુક્તા રચને સમર્થા ભજામહે તં વિકટં પરેશમ્ ॥ ૪॥

તથા હ્યસદ્રૂપમયં ચ સાઙ્ખ્યં કૃતં તથા બ્રહ્મ સુબોધરૂપમ્ ।
અનન્તભેદાશ્રિતમપ્રમેયં ભજામહે તં વિકટં પરેશમ્ ॥ ૫॥

તતઃ સ્વબોધેન કૃતં ચ સોઽહં પવિત્રમેકાશ્રિતમાદિરૂપમ્ ।
જગદ્ધરં બિન્દુમયં તથા વૈ ભજામહે તં વિકટં પરેશમ્ ॥ ૬॥

જગચ્ચતુષ્પાદમયં ચ તાભ્યાં વ્યષ્ટ્યા સમષ્ટ્યા ચ યુતં હિ સૃષ્ટમ્ ।
અજેષુ સઞ્જીવનદં ગણેશં ભજામહે તં વિકટં પરેશમ્ ॥ ૭॥

તતં ત્વયા ભેદવિહીનભાવાત્ પ્રકાશરૂપેણ વિભાસિ નાથ! ।
અનન્તલીલાકરમપ્રમેયં ભજામહે તં વિકટં પરેશમ્ ॥ ૮॥

અજૈર્વિહીનોઽસિ ગજાનન! ત્વં તથાઽપિ સર્વત્ર વિભાસિ ભક્ત્યા ।
અતો ગણેશં વિકટં વદન્તિ ભજામહે તં વિકટં પરેશમ્ ॥ ૯॥

હરિસ્વરૂપેણ વિનાયક! ત્વં સુરક્ષસીદં રજસા વિધાતા ।
તથા તમોયુક્તતયા હરોઽસિ ભજામહે તં વિકટં પરેશમ્ ॥ ૧૦॥

પ્રસૃષ્ટકર્માણિ તદન્તરસ્થોર્યમાઽસિ સઞ્જીવનરૂપકેણ ।
ક્રિયાસ્વરૂપેણ તુ શક્તિસંસ્થો ભજામહે તં વિકટં પરેશમ્ ॥ ૧૧॥

સદાત્મરૂપેણ ચ ઢુણ્ઢિરાજ! સ્થિતોઽસિ વિશ્વમ્ભર વિશ્વમૂર્તે! ।
ન તે કદાચિજ્જગતિ પ્રવેશો ભજામહે તં વિકટં પરેશમ્ ॥ ૧૨॥

સદાઽઽદિપૂજ્યં સકલૈઃ સુવન્દ્યં ગણેશસિદ્ધિપ્રદમાસમન્તાત્ ।
સુચિત્તભાસં ગજકર્ણધારં ભજામહે તં વિકટં પરેશમ્ ॥ ૧૩॥

સ્વાનન્દનામ્નિ નગરે સુસંસ્થં ત્રિનેત્રયુક્તં મૂષકોપરિસ્થમ્ ।
મહોદરં ચૈકરદં વિભૂપં ભજામહે તં વિકટં પરેશમ્ ॥ ૧૪॥

સ્વભક્તપક્ષેષુ વિરાજમાનં વિઘ્નૈર્વિહીનં મનસેપ્સિતં ચ ।
અભક્તસર્વાશ્રિતનાશકારં ભજામહે તં વિકટં પરેશમ્ ॥ ૧૫॥

નિયન્તૃરૂપં તવ હસ્તસંસ્થં જગત્સુ નાનાવિધબ્રહ્મસુ પ્રભો! ।
મહાઙ્કુશં હ્યઙ્કુશધારમેકં ભજામહે તં વિકટં પરેશમ્ ॥ ૧૬॥

ભ્રમાત્મકં બન્ધનમેકમેવ તદેવ પાશં પ્રભુહસ્તસંસ્થમ્ ।
સ્વભક્તિકૃદ્બન્ધનહાનિકારં ભજામહે તં વિકટં પરેશમ્ ॥ ૧૭॥

ત્વદાશ્રિતાનાં ન ભયં કદાચિત્ સદાઽભયં તે કરસંસ્થિતં ચ ।
પ્રત્યજ્ય દુષ્ટા ભયસંયુતાસ્તે ભજામહે તં વિકટં પરેશમ્ ॥ ૧૮॥

નિજામૃતં વિઘ્નપતે યદન્નં જગત્સુ સંસ્થં પ્રભુહસ્તગં તમ્ ।
સુમોદકં મોદકરં જનાનાં ભજામહે તં વિકટં પરેશમ્ ॥ ૧૯॥

અસન્મયી સર્વગતા વિભિન્ના પરં સદાઽસ્યાશ્ચ સુશાન્તિસંસ્થમ્ ।
અતો વદન્તે વિકટં જનાસ્ત્વાં ભજામહે તં વિકટં પરેશમ્ ॥ ૨૦॥

વયં સ્તુવીમોઽલ્પસુબોધગાઃ કિં પ્રભું ન શક્યં નિગમાદિભિશ્ચ ।
શુકાદિભિઃ સ્તોતુમપારગં યં ભજામહે તં વિકટં પરેશમ્ ॥ ૨૧॥

તથાપિ તે દર્શનજેન નાથ બોધેન બ્રહ્મેશ! સુસંસ્તુતોઽસિ ।
અતઃ પ્રતુષ્ટો ભવ દીનપાલ! ભજામહે તં વિકટં પરેશમ્ ॥ ૨૨॥

વિકટ ઉવાચ -
ઇદં સ્તોત્રં કૃતં સર્વૈર્મદીયં મત્પદપ્રદમ્ ।
ભવિષ્યતિ જનાયૈવ પઠતે શ◌ૃણ્વતે પરમ્ ॥ ૨૬॥

ભક્તિમુક્તિપ્રદં પૂર્ણં પુત્રપૌત્રાદિવર્ધનમ્ ।

ધનધાન્યાદિકં કામપ્રદં સ્તોત્રસ્ય પાઠતઃ ॥ ૨૭॥

ષટ્કર્મસાધનકરં પરકૃત્યવિનાશનમ્ ।
નાનારોગહરં પૂર્ણં ભવિષ્યતિ સુસેવિનામ્ ॥ ૨૮॥

કારાગૃહગતાનાં ચ બન્ધમોક્ષકરં ભવેત્ ।
સહસ્રાવર્તનેનૈવ સદા સૌભાગ્યવર્ધનમ્ ॥ ૨૯॥

નાનાપાપસમૂહાનાં દાહકં પઠનાત્તથા ।
સર્વસિદ્ધિકરં ચૈવ ભવિષ્યતિ ન સંશયઃ ॥ ૩૦॥

એકવિંશતિવારં યઃ પઠિષ્યતિ નિરન્તરમ્ ।
સ સર્વં સાધયેત્ સદ્યો દિનાનામેકવિંશતિમ્ ॥ ૩૧॥

ઇતિ દેવર્ષિભિર્પ્રોક્તા વિકટસ્તુતિઃ સમાપ્તા । ૬.૩૬

Encoded by Ajit Krishnan

Proofread by Ajit Krishnan, PSA Easwaran

*Vikata Stuti by Devarshi*

pdf was typeset on April 28, 2023

Please send corrections to *sanskrit@cheerful.com*